# Devadibhih Kritam Krishnanarayana Stotram

# દેવાદિભિઃ કૃતં કૃષ્ણનારાયણસ્તોત્રમ્

## Document Information

Text title : Devadibhih Kritam Krishnanarayana Stotram

File name : devAdibhiHkRRitaMkRRiShNanArAyaNastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 531/72-97||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# દેવાદિભિઃ કૃતં કૃષ્ણનારાયણસ્તોત્રમ્

સર્વાનન્દા મુક્તયશ્ચ યસ્યાઽક્ષિકોણકે સ્થિતાઃ ।
સર્વે દેવાશ્ચ ઋષય ઈશ્વરા યન્મનોભવાઃ ॥ ૭૨॥

તસ્માયનાદિશ્રીકૃષ્ણનારાયણાય વૈ નમઃ ।
સ્વામિને બાલરૂપાય વલ્લભાય ચ તે નમઃ ॥ ૭૩॥

મુક્તાનાં પતયે ધામ્નાં પતયે તે નમો નમઃ ।
અવતારવૃન્દધર્ત્રે ઈશ્વરેશાય તે નમઃ ॥ ૭૪॥

રાધાલક્ષ્મીસ્વામિને તે જયાયાઃ પતયે નમઃ ।
લલિતામાણિકીપદ્માપાર્વતીશાય તે નમઃ ॥ ૭૫॥

પ્રભાવૃન્દાતુલસીશ્રીપદ્માવતીશ તે નમઃ ।
મઞ્જુલાકાન્ત હંસેશ યોગીશેશ ચ તે નમઃ ॥ ૭૬॥

કમલાકાન્ત સિદ્ધીશ તે પ્રત્યક્ષ નમોનમઃ ।
નમો હૃદયવાસાથ સર્વાન્તર્યામિણે નમઃ ॥ ૭૭॥

નમઃ મયૂરપિચ્છાઢ્યમુકુટધારિણે નમઃ ।
નમઃ કૌસ્તુભસંશોભદ્વક્ષઃસ્થલાય તે નમઃ ॥ ૭૮॥

નમઃ કુણ્ડલકર્ણાય સ્વર્ણહારાય તે નમઃ ।
સર્વશક્તિસ્વરૂપાય કામકામાય તે નમઃ ॥ ૭૯॥

નૈકાસુરવિનાશાય ભક્તત્રાણાય તે નમઃ ।
ભક્તવાઞ્છિતદાત્રે તે શ્રીકૃષ્ણાય નમો નમઃ ॥ ૮૦॥

ધન્યેયં કુઙ્કુમવાપી ધન્યોઽયં લોમશો મુનિઃ ।
અશ્વપટ્ટસરો ધન્યં ધન્યં વ્યાઘ્રવનં શુભમ્ ॥ ૮૧॥

ધન્યા ઇમે ચ ઋષયો ધન્યા દ્રુતૃણભૂરુહાઃ ।
ધન્યાઃ પક્ષગમા જીવા ધન્યા ભૂવાસકારિણઃ ॥ ૮૨॥

ધન્યા નરાસ્તથા નાર્યો ધન્યં ચરાચરં ત્વિદમ્ ।
યત્ર વૈ બાલરૂપસ્ત્વં વર્તસે પુરુષોત્તમઃ ॥ ૮૩॥

દૃશ્યસે સર્વવિષયો ગમ્યસે જ્ઞાનિભિઃ ખલુ ।
અદ્ય નઃ સફલં જન્મ પુણ્યં નઃ પારવર્જિતમ્ ॥ ૮૪॥

સૃષ્ટિસઞ્ચાલકૈર્યો ન પ્રાપ્યતે દૃશ્યસેઽત્ર નઃ ।
અનેકજન્મશુદ્ધાનાં દર્શનં તેઽત્ર યુજ્યતે ॥ ૮૫॥

અસ્માકં ચાત્ર સઞ્જાતં પુરુષાર્થચતુષ્ટયમ્ ।
શરણ્યં યત્પદં લબ્ધં પ્રત્યક્ષં સેવનોચિતમ્ ॥ ૮૬॥

ઇત્યેવં સ્તવનં કૃત્વા બાલવેષં પુમુત્તમમ્ ।
પુપૂજુઃ પરયા ભક્ત્યા શ‍ૃઙ્ગારિતં જગત્પ્રભુમ્ ॥ ૮૭॥

ઉપદાઃ પ્રદદુઃ સર્વે ચક્રુશ્ચ તિલકં શુભમ્ ।
આરાર્ત્રિકં પ્રચક્રુશ્ચ નેમુસ્તુષ્ટુવુરાદરાત્ ॥ ૮૮॥

પ્રદક્ષિણં પ્રચક્રુશ્ચ નૈવેદ્યં વિવિધં દદુઃ ।
દેવા દેવ્યઃ પુષ્પવૃષ્ટિં ચક્રુઃ કૃષ્ણસ્ય મૂર્ધનિ ॥ ૮૯॥

મહોત્સવે કોટિશો વૈ ભુવનાનાં નિવાસિનઃ ।
સમાયાતા જયન્ત્યાં શ્રીકૃષ્ણનારાયણસ્ય તે ॥ ૯૦॥

દર્શનં ચ પ્રસાદં ચ ચરણામૃતમિત્યપિ ।
શુભાશિષશ્ચ સઙ્ગૃહ્ય યયુર્નિજાલયં મુદા ॥ ૯૧॥

અનાદિશ્રીકૃષ્ણનારાયણસ્યૈતત્ સ્તવં શુભમ્ ।
પરમૈશ્વર્યજનકં સુખદં સમ્પદાપ્રદમ્ ॥ ૯૨॥

નિર્વાણમોક્ષદં લક્ષ્મિ! હરિભક્તિપ્રદં પરમ્ ।
અક્ષરેશપદદાતૃ સર્વસિદ્ધિપ્રદં વરમ્ ॥ ૯૩॥

લોભમોહકામક્રોધકર્મમૂલનિકૃન્તનમ્ ।
બલબુદ્ધિપ્રદં ચૈવ જન્મમૃત્યુવિનાશનમ્ ॥ ૯૪॥

ધનપુત્રપ્રિયાભૂમિપતિસમ્પત્પ્રદં નૃણામ્ ।
શોકદુઃખહરં યશ્ચ પઠેદ્વા શ‍ૃણુયાચ્ચ વા ॥ ૯૫॥

બન્ધનાન્મુચ્યતે દુઃખી ભીતો મુચ્યેત વૈ ભયાત્ ।
રોગાદ્વિમુચ્યતે રોગી દરિદ્રશ્ચ ધની ભવેત્ ॥ ૯૬॥

દસ્યુગ્રસ્તો રિપુગ્રસ્તો હિંસ્રજન્તુસમાવૃતઃ ।
સ્તોત્રેણાઽનેન વૈ લક્ષ્મિ! કલ્યાણં લભતે જનઃ ॥ ૯૭॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૫૩૧-અધ્યાયાન્તર્ગતં
દેવાદિભિઃ કૃતં કૃષ્ણનારાયણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૫૩૧/૭૨-૯૭॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 531/72-97..

Proofread by PSA Easwaran

*Devadibhih Kritam Krishnanarayana Stotram*
pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*